आद्यद्वितीयदिनयोः पञ्च पञ्च पिण्डाः। द्वादशाहाद्यशौचे नवदिनेषु नवपिण्डाः। शेषदिने दशमः। सद्यः शौचैकाहयोरेकाह एव दशपिण्डाः। अशौचान्तमध्ये पिण्डो देयः रात्रावपि ॥ * ॥

गङ्गाम्भस्यस्थिप्रक्षेपप्रयोगस्तु। ततः स्नात्वाचम्य उदङ्मुखः कुशत्रयजलान्यादाय ॐ तत्सदित्युच्चार्य्य अद्यामुकेत्यादि अमुकस्य एतदस्थिसमसंख्यकवर्षसहस्रावच्छिन्नस्वर्गाधिकरणकमहीयमानत्वकामोऽमुकस्यैतान्यस्थिखण्डानि गङ्गायां प्रक्षिपामीति सङ्कल्प्यापसव्यं कृत्वास्थीनि पञ्चगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलैः संयोज्य मृत्तिकापुटे स्थापयित्वा दक्षिणहस्तेन तत्पुटकमादाय दक्षिणां दिशं पश्यन् ॐ नमोऽस्तु धर्म्मराजायेति वदन् जलं प्रविश्य स मे प्रीतो भवत्वित्युक्त्वास्थि प्रक्षिपेत्। ततो मज्जनं कृत्वोत्थाय सूर्य्यं दृष्ट्वा दक्षिणामुत्सृजेत्। इति शुद्धितत्त्वं ॥ * ॥ किञ्च शातातपः।

“जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये”।

पारस्करः। मृण्मये तां रात्रिं क्षीरोदके विहायसि निदध्युः। प्रेतात्र स्नाहीत्युदकं पिब चेदं क्षीरं। इदं रात्राविति गौड़ाः। गारुड़े तु।

“अपक्वे मृण्मये पात्रे दुग्धं दद्यात् दिनत्रयम्”।

इत्युक्तं। हेमाद्रौ पाद्मे तु दशाहमुक्तं।

“तस्मान्निधेयमाकाशे दशरात्रं पयो जलं।

सर्व्वतापोपशान्त्यर्थमध्वश्रमविनाशनं” ॥

देवजानीये कारिकायां।

“तत्र प्रेतोपकृतये दशरात्रमखण्डितं।

कुर्य्यात् प्रदीपं तैलेन वारिपात्रञ्च मार्त्तिकं ॥

भोज्यात् भोजनकाले तु भक्तमुष्टिञ्च निर्व्वपेत्।

नामगोत्रेण सम्बुध्य धरिन्यां पितृयज्ञवत्” ॥

इति निर्णयसिन्धौ ५ परिच्छेदः ॥

अन्त्रं, क्ली, (अन्त्यते कायः सम्बध्यतेऽनेन अति बन्धने करणे ष्ट्रन्।) पुरीतत्। इत्यमरः ॥ आँत्ड़ी (आँत् इति भाषा। आँत् इति ख्यातः देहबन्धको नाड़ीभेदः।

उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः।
अर्द्धव्यामेन हीनानि स्त्रीणामन्त्राणि निर्दिशेत् ॥
इति वैद्यकम्।)

अन्त्रवृद्धिः, स्त्री, पुं, (अन्त्रजन्या वृद्धिः, शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च।) रोगविशेषः। तन्निदानादि यथा,—

“वातकोपिभिराहारैः शीततोयावगाहनैः।

धारणे रणभाराध्वविषमाङ्गप्रवर्त्तनैः ॥

क्षोभणैः क्षोभितान्यैश्च क्षुद्रान्त्रावयवं यदा।

पवनो द्विगुणीकृत्य स्वनिवेशादधो नयेत् ॥

कुर्य्याद्वंक्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा”।

धारणं उपस्थितस्य वेगस्य। ईरणं अनुपस्थितस्य वेगस्य प्रेरणं।

“विषमाङ्गप्रवर्त्तनं वक्रत्वेनाङ्गमोटनं”।

अन्यानि क्षोभणानि च बलवद्विग्रहकठोरधनुराकर्षणादीनि। तैः क्षोभितः संदूष्य सञ्चालितः पवनः यदा क्षुद्रान्त्रावयवं द्विगुणीकृत्य स्वनिवेशादधो नयेत्। तदा वंक्षणसन्धिस्थः सन् वंक्षणसन्धौ ग्रन्थिरूपं श्वयथुं कुर्य्यात् इत्यर्थः ॥ * ॥

उपेक्षिताया अन्त्रवृद्धेरवस्थामाह।

“उपेक्ष्यमाणस्य मरुद्विवृद्धि-
माध्मानरुक् स्तम्भवतीञ्च कुर्य्यात्।
स पीड़ितोऽन्तः स्वनवान् प्रयाति
प्रध्मापयन्नेति पुनश्च मुक्तः ॥

उपेक्ष्यमाणस्य वृद्धिमित्यर्थः। मरुद्वृद्धिं मुष्कवृद्धिं। आध्मानरुक् स्तम्भवतीं कुर्य्यात्। तत्राध्मानमुदरे रुक् वृद्धयोर्मुष्कयोः स्तम्भो गात्रे तद्युक्तां कुर्य्यात् इत्यर्थः। भोजोऽप्याह।

“अन्त्रं द्विगुणमादाय वातो नयति वंक्षणं।

वंक्षणात्तद्गता युक्तं फलकोष्यां प्रपद्यते” ॥

स मुष्कवृद्धिः। अन्तः उदरे प्रध्मापयन् आगमनमार्गमुच्छूनं कुर्व्वन् एति प्रयाति ॥ * ॥ असाध्यमाह।

“यस्यान्त्रावयवश्लिष्टान्मुष्कयोर्व्वातसञ्चयात्।

स्यादन्त्रवृद्धिः सोऽसाध्यो वातवृद्धिसमाकृतिः” ॥

स कीदृक् स्यादित्याकाङ्क्षायामाह। वातवृद्धिसमाकृतिः ॥ * ॥ सामीप्यादत्रैव व्रध्नमाह।

“अत्यभिष्यन्दिगुर्व्वन्नशुष्कपूत्यामिषाशनात्।

करोति ग्रन्थिवच्छोथं दोषो वंक्षणसन्धिषु ॥

ज्वरशूलाङ्गसादाढ्यं तं व्रध्नमिति निर्दिशेत्” ॥ * ॥

अथ वृद्धेश्चिकित्सा।

“वृद्धावत्यासनं मार्गमुपवासं गुरूणि च।

वेगाघातं पृष्ठयानं व्यायामं मैथुनं त्यजेत् ॥

वातवृद्धौ पिबेत् स्निग्धं यथाप्राप्तं विरेचनं।

सक्षीरं वा पिबेत् तैलं मासमेरण्डसम्भवं ॥

गुग्गुल्वेरण्डजं तैलं गोमूत्रेण पिबेन्नरः।

वातवृद्धिं जयत्याशु चिरकालानुबन्धिनीं ॥

पित्तग्रन्थिक्रमेणैनं पित्तवृद्धिमुपाचरेत्।

जलौकाभिर्हरेद्रक्तं वृद्धौ पित्तसमुद्भवे ॥

चन्दनं मधुकं पद्ममुशीरं नीलमुत्पलं ॥

क्षीरपिष्टप्रलेपेन दाहशोथरुजापहं ॥

त्रिकटुः त्रिफलाक्काथं सक्षारं लवणं पिबेत्।

विरेचनमिदं श्रेष्ठं कफवृद्धिविनाशनं ॥

लेपनं कटुतीक्ष्णोष्णं स्वेदनं रूक्षमेव च।

परिषेकोपनाहौ च सर्व्वमुष्णमिहेष्यते ॥

मुहुर्मुहुर्जलौकाभिः शोणितं रक्तजे हरेत्।

पिबेद्विरेचनं वापि शर्कराक्षौद्रसंयुतं ॥

शीतमालेपनं सर्व्वं सर्व्वं पित्तहरं तथा।

पित्तवृद्धिक्रमं कुर्य्यादामे पक्वे च रक्तजे ॥

स्वेदोमेदः समुत्थे तु लेपयेत् सुरसादिना।

शिरो विरेचनद्रव्यैः सुखोष्णैर्मूत्रसंयुतैः ॥

संस्वेद्य मूत्रप्रभवं वस्त्रपट्टेन वेष्टयेत्।

सीवन्याः पार्श्वतोऽधस्तात् विध्यद्व्रीहिमुखेन वै ॥

मुष्कशोथमगच्छन्त्यामन्त्रवृद्धौ विचक्षणः”।

व्रीहिमुखेन शस्त्रविशेषेण। अगच्छन्त्यां असत्यां ॥

“तैलमेरण्डजं पीत्वा बलासिद्धं पयोन्वितं।

आध्मानशूलोपचितामन्त्रवृद्धिं जयेन्नरः ॥

रास्नायष्ट्यमृतैरण्डबलारग्वधगोक्षुरैः।

पटोलेन वृषेणापि विधिना विहितं शृतं ॥

एवुतैलेन संयुक्तमन्त्रवृद्धिं व्यपोहति”।

रास्नादिक्काथः ॥ * ॥

“गन्धर्व्वहस्ततैलेन वृषेणापि युतं पिबेत्।

विशालामूलजं चूर्णं वृद्धिं हन्यान्न संशयः”।

विशाला इन्द्रवारुणी ॥ * ॥

“वचासर्षपकल्केन प्रलेपः शोथनाशनः।

शिग्रुत्वक्सर्षपैः पिष्टैः शोथश्लेष्मानिलापहः ॥

शुद्धसूतं द्विधागन्धं मृतान्येतानि योजयेत्।

लोहं रङ्गं तथा ताम्रं कांस्यञ्चाथ विशोधितं ॥

तालकं तुत्थकं वापि तथा शङ्खं वराटकं ॥

त्रिकटु त्रिफला चव्यं विड़ङ्गं वृद्धदारकं ॥

कर्चूरं मागधीमूलं पाठां सहवुषां वचां।

एलावीजं देवकाष्ठं तथा लवणपञ्चकं ॥

एलादिसमभागानि चूर्णयेदथ कारयेत्।

कषायेण हरीतक्या वटिकां टङ्कसम्मितां ॥

एकां तां वटिकां यस्तु निगिलेद्वारिणा सह।

अण्डवृद्धिरसाध्योऽपि तस्य नश्यति सत्वरं” ॥

वृद्धिबाधिका वटी ॥ * ॥ अथ व्रध्नस्य चिकित्सा।

“भृष्टश्चैरण्डतैलेन सम्यक् कल्कोऽभयाभवः।

कृष्णासैन्धवसंयुक्तो व्रध्नरोगहरः परः ॥

अजाजीहवुषाकुष्ठं गोमेदवदरान्वितं।

काञ्जिकेन तु संपिष्टं तल्लेपो व्रध्नजित् परः” ॥

गोमेदं पत्रं। तथा च निर्घण्टौ धन्वन्तरिः।

“पत्रं हलाह्वयं रामं गोमेदं वसनाह्वयं”।

इतिवृद्धिव्रध्नधिकारः। इति भावप्रकाशः ॥

अन्दिका, स्त्री, (अन्दति नाद्याय ज्येष्ठभगिनीत्वं सम्बध्नाति, अदि + ण्वुल् स्त्रियां टाप्। नाट्योक्तौ ज्येष्ठभगिनी इत्यमरटीकायां।) अन्तिका। चुल्ली। इत्यमरटीकायां नीलकण्ठः ॥ चुला इति भाषा।

अन्दुः, स्त्री, (अन्द्यते बध्यतेऽनेन, अदि + करणे उण् बाहुलकात्।) हस्तिनिगड़ः। आँदुया इति भाषा। स्त्रीपादभूषणं। इति हेमचन्द्रो भूरिप्रयोगश्च ॥ मल पञ्चम इत्यादि भाषा।

अन्दुकः, पुं, (अन्द्यते बध्यतेऽनेन, अदि + करणे उण्, ततः स्वार्थे कन्।) हस्तिपादबन्धनशृङ्खलः। तत्पर्य्यायः। निगड़ः २। इत्यमरः ॥ पादालङ्कारविशेषः। तत्पर्य्यायः। पादकटकः २। इति त्रिकाण्डशेषः ॥

अन्दूः, स्त्री, (अन्द्यते बध्यतेऽनेन, अदि + उण् ततः ऊङुत इति स्त्रियां ऊङ्।) हस्तिपादबन्धनलौहनिगड़ः। आन्दुया इति भाषा। स्त्रीपादभूषणं। मल गुजरी इत्यादि भाषा। इति मेदिनी ॥ (निगड़ः। शृङ्खला। बन्धनरज्जुः। अन्दः स्त्रियां स्यान्निगड़े प्रभेदे भूषणस्य च। इति मेदिनी।)

अन्दूकः, पुं, (अन्दू + स्वार्थे कन्, पृषोदरादित्वात् पक्षे केहृण इति ह्रस्वाभावः। स्वार्थिकप्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिक्रामन्ति इति पुंस्त्वमन्यथा अन्दूका इति स्यात्।) अन्दुः। इत्यमरटीकायां स्वामी ॥ अन्धत् क दृक्क्षये। इति कविकल्पद्रुमः ॥ (पाणिनिमते तु अन्धदृष्टि